International Journal of Sanskrit Research 2022; 8(3): 09-10

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(3): 09-10
© 2022 IJSR
www.anantaajournal.com
Received: 02-03-2022
Accepted: 06-04-2022

**अनुजकुमार**
शोध छात्र, संस्कृत, केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली, भारत

**Corresponding Author:**
**अनुजकुमार**
शोध छात्र, संस्कृत, केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली, भारत

# सीतारामीयं काव्ये अलङ्काराः

**अनुजकुमार**

**प्रस्तावना**

अलङ्कारः संस्कृतसाहित्यशास्त्रस्य प्राचीनतमं तत्वम्। साहित्यशास्त्रस्य प्राचीनतमो ग्रन्थः भरतमुनिविरचिते नाट्यशास्त्रे यद्यपि अलङ्कारस्य परिभाषा न भवति तथापि उपमा–यमक–रूपक तथा दीपकाद्यलङ्काराणां विवेचनं वर्तते। निरुक्ते उपमायाः श्रौति आदि भेदः तथा वाल्मीकिरामायणे अलङ्काराणां विविधप्रयोगः परिदृश्यते।

विदुषां मते अलङ्काराणां त्रयो भेदाः स्वीक्रियन्ते –

1. शब्दालङ्काराः
2. अर्थालङ्काराः
3. उभयालङ्काराः।

'शब्दार्थौ सहितौ काव्यम्' [1] इति भामहकथनेन स्पष्टं भवति यत् 'सत्यं शिवं सुन्दरम्' इत्यत्र चरमतत्वं सुन्दरमेव वर्तते। शिवसुन्दरयोश्च तदा सत्येन सह संयोगो भवति, यदा संसारे मंगलोदयः भवति। ते आचार्याः गुणः, रसः, रीतिः भावादिविषयाः अलङ्कारस्य अन्तर्गते मन्यन्ते। भगवान् शंकरः अलङ्कारशास्त्रस्य शिक्षणं सर्वप्रथमं ब्रह्मणे दत्तवान् ब्रह्मा च देवेभ्यः कविभ्यः ऋषिभ्यश्च तच्छिक्षां ददौ। तदनुसृत्याष्टादश ब्रह्मशिष्याः अष्टादशस्वधिकरणेषु शास्त्रमिदं निबद्धवन्तः। नन्दिकेश्वरो रसम्, धिषणो दोषान् उपमन्युर्गुणान्, भरतश्च रूपकाणि निरूपितवान्।

अलङ्कारो नाम सौन्दर्यं यथा – कटककुण्डलहारादिभिः आभूषणैः कामिन्याः सौन्दर्यवृद्धिः भवति। तथैव अनुप्रास–उपमादिभिः अलङ्कारः कविताकामिन्याः शोभावर्धनं क्रियते। येन कविताकामिनीकुरूपासत्यपि सौन्दर्यं प्राप्नोति। अतः शंकरदेवावतरेमहोदयकृताऽस्मिन् काव्ये अनेकानामलङ्काराणां प्रयोगः उत्तमरीत्या कृतः।

यद्यपि अस्मिन् काव्ये कविना अलङ्काराणां प्रयोगः सहसा न कृतः किन्तु अलङ्काराः सिद्धकाव्ये सहजैव उपस्थिता भवन्त्येव इति न्यायमनुस्मृत्य 'सीतारामीयं काव्ये अलङ्काराणां भावानां सम्प्रेषणाय सहसा उपस्थितिः वर्तत एव।

'सीतारामीयम्' काव्ये शब्दालङ्काराणां तथा उत्प्रेक्षा–रूपक–उपमा–अर्थान्तरन्यास–परिकर–समासोक्ति इत्यादीनाम् अर्थालङ्काराणां सौन्दर्यं विराजते। अर्थालङ्कारेषु उत्प्रेक्षा–रूपक–उपमा–अर्थान्तरन्यासालङ्काराणां सौन्दर्यम् अतिशेते। 'सीतारामीयं' काव्यस्य तृतीयपद्ये उपमायाः सौन्दर्यमतीवोत्कृष्टं सुशोभते। यथोक्तम् अवतरेमहोदयेन–

यत् त्यागात् कीर्तितोऽहं दिशि दिशि जनतारजने लब्धवर्णः,
साऽपि त्वेका प्रजायाः प्रतिकृतिरमला विप्रलब्धा मयैव।
निन्दत्यभ्यन्तरं मे रहसि तदखिल यत् करोमि प्रकाशम्,
दीपेनाहं समानस्तलगततमसा भासमानेन दिक्षु।। [2]

इत्यस्मिन् पद्ये कविः कथयति यत् यस्याः सीतायाः परित्यागात् चतुर्षु दिक्षु जनतायाः रजनरूपे मम कीर्तिः प्रासरत्। सा सीताऽपि निष्पापरूपेण मम प्रजायाः एव एकः भागः आसीत्, या मया वञ्चयित्वा वनं त्यक्तम् इदं कार्यं मम प्रजारंजने धिक्कारः। अतः रामस्य स्थितिः इदृशी अस्ति यथा – बहिः प्रकाशमानोऽपि दीपकः स्वस्य निवेशस्थानस्य अन्धकारं दूरीकरोति तथा रामोऽपि बहिः प्रजानुरंजयन् सीतासम्बन्धेन हृदयस्थ पीडां पालयति इति भावः। श्लोकस्योत्तरार्धे उपमालङ्कारः साम्यं वाच्यं वैधर्म्यं वाक्यैक्य उपमाद्वयोः [3] इति तल्लक्षणात्।

अर्थालङ्कारेषु रूपकालङ्कारस्यापि प्रयोगः सम्यक्रूपेण कृतः कविना सीतारामीयं नामके काव्ये –

सौभाग्येन स्त्रियः सोश्रवसमुदयते ध्वस्तदुःखान्धकारम्,
भर्त्रा संसूर्क्षणैः सा विदलयति कदलीव प्रवातैर्विधूता।
देव्या जेहनीयते मामवशमवसथात् सापदेशो विवासः,
सा मे विश्वासघाताद् विलयति विजने छिन्नमूलेव वल्ली।।[4]

इत्यस्मिन् श्लोके कविना कथितं यत् – पतिकृतस्नेहसौभाग्येन नारी यः सौभाग्यः प्राप्तः तेन नार्यः ईदृशम् उज्ज्वलरूपं यशश्च प्रसरति येन सर्वे क्लेशाः तथैव नष्टाः भवन्ति यथा सूर्योदये। सति अन्धकारं नष्टं भवति। अतोऽत्र ध्वस्तदुःखान्धकारम् अत्र रूपकालङ्कारः। ''रूपकं रूपितारोपो विषये निरपह्नवे।।[5]
सीतारामीयं काव्ये सामान्यतया एकोऽपि श्लोकः एतादृशः नास्ति यत्र अलङ्कारः नास्ति अर्थात् सर्वेषु पद्येषु अलङ्कारस्य छटा सर्वभावेन दरीदृश्यते। यथा – कवि श्रीशंकरदेवावतरेमहोदयः सीतारामचन्द्रयोः सौन्दर्ये निमज्जति कविता कामिनयाम् अलङ्काराणां झंकृत्यपि वर्धते। अतः काव्येऽस्मिन् महोदयेन 'अर्थान्तरन्यासः' अलङ्कारस्य प्रयोगोऽपि समीचीनतया कृतः। यथा –

वैदेहि त्वामरक्षं विपिनवसतीं रक्षसो रक्षणीयाम्,
तस्माल्लंकास्थितायाः किमपि चरितगं नवरीणं तवास्ति।
भूत्वा ते दण्डनीयोऽप्यहमकृतितया दण्डये प्रत्युतत्वाम्,
अन्येषां रामराज्यं भवतु तव कृते जांगलं राज्यमेतत्।।[6]

अर्थात् अदण्डनीयां सीतां दण्डयन्नहं राजधर्माद्विच्युतोऽस्मि। मयापि स्वस्य दोषेण सीता दण्डिता इत्याह। श्रीरामः स्वमनसि चिन्तयित्वा तुदति यत् मया पतिधर्मस्य पालनं समीचीनतया न कृतम्। यत्र निर्बलानां रक्षां प्रति न कोऽपि न्यायः तद् राज्यं जंगलराज्यमेव मन्तव्यम् इति तात्पर्यम्। 'कार्येण कारणस्य समर्थयत् अर्थान्तरन्यासः।' काव्येऽस्मिन् प्रमुखालङ्काराणां प्रायशः सर्वेषामेव प्रयोगः विद्यते इति।
इतोऽपि –

दृष्टा पूर्वं यदा त्वं जनकपुरगृहे मेऽनुपातोऽमासीत्,
पूर्वं तस्मादपि त्वं कथमिव विषयो नेत्रयोर्मे न जाता।
निष्पर्यन्ता वियोगाः कृतरणरणका अद्य मां ज्ञापयन्ति,
दृष्टानां दुर्विपाकादकृतपरिचयं स्याददृष्टं वरीयः।।[7]

अर्थात् धनुर्यज्ञकाले यस्मिन् अवसरे मिथिलासदने सीता अवलोकिता मया। मे (रामस्य) वक्ष्यमाणः पश्चात्तापः अभवत्। कीदृशोऽनुतापः इत्यत आह – पूर्वोक्तात् मिलनकालात् अपि पूर्वं त्वं (सीता) मे (रामस्य) चक्षुषोः लक्ष्यं कस्मात् कारणात् न जायते स्म। ते लोकातिशायिसौन्दर्यहेतोस्त्वत्प्रथमदर्शनादपि पूर्वं त्वद्दर्शनं कामये स्म, इति भावः। सम्प्रति अन्तहीनाः जनितदुश्चिन्ताः विप्रयोगाः माम् (रामं) बोधयन्ते। किं बोधयन्ते इत्यतः आह – सुन्दरवस्तूनां वियोगरूपदुष्परिणामात् अज्ञातं परोक्षम् साधुतरम् अस्ति। दुःखोदर्कस्य सौन्दर्यस्य दर्शनापेक्षया तस्यादर्शनमेव श्रेष्ठम्, इति भावः। अदृष्टं भाग्यार्थकमपि वर्तते। तत्पक्षे जीवनस्य प्रत्यक्षकटुताभिः परिक्लिश्यमानो लोको भागधेयपरनामकम् अदृष्टमेवानुरुध्यते। यत्नैरपि दुःखप्रतिकारस्य असम्भवाद् भाग्यानुसरणमेव वरम्, इत्यपि रामस्य आत्मसंतोषः संगच्छेत्।
उत्तरार्धे निदर्शनार्थान्तरन्यासयोरेकाश्रयानुप्रवेशः संकरः। 'अदृष्टम्' इत्यस्मिन् नेत्रविषयानागतेऽर्थे भागधेयस्यार्थस्य अध्यवसायादतिशयोक्तिरेकाश्रयानुप्रवेशसंकरभेदस्य विच्छित्तिमूला तिष्ठति। पूर्वं निन्दास्पदस्य 'अदृष्ट' पदार्थस्य पश्चात् प्रशंसनात् विकस्वरः तेनोत्थापितो विरोधाभासोऽपि संगमनीयः।
एवमेव काव्येऽस्मिन् अन्येषामलङ्काराणामपि शोभनः प्रयोगः कृतः कविशंकरदेवावतरेमहोदयेन।

## संदर्भ


1. आचार्यभामहः – काव्यालङ्कारः
2. सीतारामीयं पूर्वार्ध 03
3. साहित्यदर्पणः दशमपरिच्छेदः
4. सीतारामीयं पूर्वार्ध 24
5. साहित्यदर्पणः दशमपरिच्छेदः
6. सीतारामीयं पूर्वार्ध 12
7. सीतारामीयं पूर्वार्ध 67